23E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : मे – २०२५**

**सत्र २ रे**

**विषयः संस्कृतभाषाकौशल–२** (23E426)

**दिनांक :१६/०५/२०२५** **गुण :१००** **वेळ : स. १०.०० ते १.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. अ) सुभाषितानाम् अर्थ माध्यमभाषया लिखत।(५तः४)** **(२०)**

१. तव करकमलस्थां स्फाटिकीमक्षमालां नखकिरणविभिन्नां दाडिमीबीजबुद्ध्या ।
प्रतिकलमनुकर्षन्येन कीरो निषिद्धः स भवतु मम भूत्यै वाणि ते मन्दहासः ।।

२. अग्निः काष्ठाज्जायते मथ्यमानाद्भूमिस्तोयं खन्यमाना ददाति ।
सोत्साहानां नास्त्यसाध्यं नराणां मार्गारब्धाः सर्वयत्नाः फलन्ति ।।

३. आनन्दताण्डवपुरे द्रविडस्य गेहे चित्रं वसिष्ठवनितासममाज्यपात्रम् ।
विद्युल्लतेव परिनृत्यति तत्र दर्वी धारां विलोकयति योगबलेन सिद्धः ।।

४. एक एव खगो मानी वने वसति चातकः ।
पिपासितो वा म्रियते याचते वा पुरन्दरम् ।।

५. हे हेरम्ब किमम्ब रोदिषि कथं कर्णौ लुठत्यग्निभूः किं ते स्कन्द विचेष्टितं मम पुरा सङ्ख्या कृता चक्षुषाम् ।
नैतत्तेऽप्युचितं गजास्य चरितं नासां मिमीतेऽम्ब मे तावेवं सहसा विलोक्य हसितव्यग्रा शिवा पातु वः।।

**आ) एकं निबन्धं संस्कृतेन लिखत।(३तः१)** **(१०)**

१. कविकुलगुरुः कालिदासः २. सत्पुरुषाणां जन्मभूमिः–महाराष्ट्रम् ३. महाविद्यालयीनं जीवनम्

**प्र.२. अ) कथाम् उचितशब्दैः पूरयत।** **(१०)**

अस्ति ----- फुल्लोत्पलनाम सरः । तत्र सङ्कटविकटनामकौ ------ निवसतः । कम्बुग्रीवनामा ------ मित्रम् एकः कूर्मः अपि तत्रैव प्रतिवसति स्म । अथ एकदा धीवराः तत्र आगच्छन् अकथयन् च वयं श्वः मत्स्यकूर्मादीन् ------- । एतत् ------ कूर्मः अवदत् मित्रे! किं युवाभ्यां धीवराणां वार्ता ----? अधुना किम् ------ करोमि? हंसौ अवदताम् ----- यद् उचितं तत्कर्तव्यम् । कूर्मः अवदत्, मैवम् । तद् यथाऽहम् ----- ह्रदं गच्छामि तथा कुरुतम् । हंसौ अवदताम्, आवां किं करवाव? कूर्मः अवदत्, अहं भवद्भ्यां सह आकाशमार्गेण --------- गन्तुम् इच्छामि ।
(मञ्जूषा– प्रातः, मगधदेशे, अन्यत्र, तयोः, श्रुत्वा, अन्यं,हंसौ, श्रुता, मारयिष्यामः, अहं)

**आ) संवादम् उचितशब्दैः पूरयत।** **(१०)**

**हरिः** ------, कः अयं खगः पञ्जरे तिष्ठति? न असौ------ । न वा मयूरः ।
**रामः** अरे, कथं न ------- एनम्? अयं शुकः । अस्य ---- ताम्रं वर्तते । पक्षौ हरितौ । मनोहरा च कण्ठरेखा । तथा च असौ मनुष्यवत् -------।
**हरिः** यदि एवं, तर्हि तम् एव अहं पृच्छामि । (---- प्रति ) शुक, किं तव नामधेयम्?
**शुकः** ----------, वैशम्पायन इति मम नामधेयम् ।
**हरिः** शोभनम् । हे वैशंपायन, किमर्थं केन च त्वं ---------- बद्धः?
**शुकः** ------, सुन्दरं मे रूपम् । मधुरं चाहं ----। संस्कृतसुभाषितान्यपि पठामि । अतः रामेणाहं बाल्ये एव बद्धः ।
(मञ्जूषा– वायसः, शुकं, चञ्चुपुटं, राम, सम्भाषते, पञ्जरे, बाल, वदामि, जानासि, हरे)

**प्र.३. अ) वाच्यपरिवर्तनं कुरुत।(७तः५)** **(१०)**

१. कृषीवलः क्षेत्रे आसायं कार्यं कृतवान् ।
२.अध्यापिका पाठान् एकाग्रतया पाठितवती ।
३. पुरातत्त्वशास्त्रज्ञाः पुरास्थलम् उत्खनितवन्तः ।
४. मशकैः जनाः दष्टाः ।
५. मया सर्वत्र ईश्वरः दृश्यते ।
६. अभियन्ता भव्यं स्थापत्यं रचयति ।
७. मयूरेण कृष्णमेघान् दृष्ट्वा नृत्यते ।

आ) **अनुच्छेदं पठित्वा सूचनानुसारम् उत्तरत।**

ततः कदाचिद्भोजराजः कालिदासं प्रति प्राह-सुकवे, त्वमस्माकं चरमग्रन्थं पठ।' ततः क्रुद्धो राजानं विनिन्द्य कालिदासः क्षणेन तं देशं त्यक्त्वा विलासवत्या सहैकशिलानगरं प्राप । ततः कालिदासवियोगेन शोकाकुलस्तं कालिदासं मृगयितुं राजा कापालिकवेषं धृत्वा क्रमेणैकशिलानगरं प्राप । ततः कालिदासो योगिनं दृष्ट्वा तं सामपूर्वं पप्रच्छ- 'योगिन् , कुत्र तेऽस्ति स्थितिः' इति । योगी वदति-सुकवे, अस्माकं धारानगरे वसतिः' इति । ततः कविराह-तत्र भोजः कुशली किम् ?' ततो योगी प्राह-'किं मया वक्तव्यम्' इति । ततः कविराह-तत्रातिशयवार्तास्ति चेत्सत्यं कथय'इति । तदा योगी प्राह-भोजो दिवं गतः' इति । ततः कविर्भूमौ निपत्य प्रलपति-'देव, त्वां विनास्माकं क्षणमपि भूमौ न स्थितिः । अतस्त्वत्समीपमहमागच्छामि' इति कालिदासो बहुशो विलप्य चरमश्लोकं कृतवान् ।

१) **सन्धीन् विघटयत।** (०५)

१. तत्रातिशयवार्तास्ति २. कविराह ३. भोजो दिवम्
४. सहैकशिलानगरम् ५.शोकाकुलस्तम्

२) **समासविग्रहं नामनिर्देशपूर्वकं कुरुत।** (१०)

१. सुकविः २. धारानगरे ३. कापालिकवेषम्
४. चरमग्रन्थम् ५. शोकाकुलः

प्र.४. अ) **तालिकां पूरयत।(१२तः१०)** (१०)

| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **विभक्तिः/पुरुषः** |
|---|---|---|---|
| ------ | ------ | जगदुः | प्रथमः |
| ------ | ------ | वस्तूनि | प्रथमा |
| ------ | शशिभ्याम् | ------ | पञ्चमी |
| मम-मे | ------ | ------ | षष्ठी |
| ------ | ------ | जानीध्वम् | मध्यमः |
| ------ | लभेवहि | ------ | उत्तमः |

आ) **रूपाणि लिखत।(१२तः१०)** (१०)

१. ब्रह्मा २. मया ३. स्थापयतु ४. वत्स्यामि ५. अन्यत् ६. उक्तिषु
७. विहाय ८. छेत्तुः ९. अम्रियन्त १०. कर्मणी ११. धीमताम् १२. कर्तव्यम्

इ) **कंसगतशब्दानां योग्यरूपाणि लिखत(७तः५)** (०५)

१. पितुः इच्छा ---------- (दयानन्द) नारोचत ।
२. --------------- (नटनर्तक) सह ते पुनः पानम् अकुर्वन् ।
३. ---------- (इदम्) प्रमदवनं शून्यम् ।
४. अहमेतत् सर्वं -----------(देवी) कथयामि ।
५. सः मूर्खः ------------- (दीन) वाणीम् अवदत् ।
६. गरुडः पणीनां --------------- (देश) अगच्छत् ।
७. अतिथीनां कृते सिद्धम् अन्नं ते यादवाः ----------- (वानर) अयच्छन् ।

----------